**सरस** न० सह रसेन जलेन आस्वादेन च सहस्य सः। १सरोवरे शब्दच० २रसान्विते ३साद्रे च त्रि०। "सरसां सरसां परिमुच्य तनुम्" भट्टिः। ४श्वेतत्रिवृतायां स्त्री राजनि०।

**सरसम्प्रत** न० सरसिव नियासं सम्प्रतनोति सम्+प्र+तन—ड। त्रिकण्टकवृक्षे (तेकाटाशिजु) शब्दच०।

**सरसिज** न० सरसि जायते जन–ड अलुक् समा०। १पद्मे राजनि० "सरसिजमनुविद्धं शैवलेनापि रम्यम्" शकु न्तला। २सारसखगे पुंस्त्री० स्त्रियां ङीष्। लुकि सरोजमप्यत्र। [स्त्रियां ङीष्।

**सरसीक** पुंस्त्री०सरस्यां कायति कै–क। सारसखगे शब्दर०

**सरसीरुह** न० सरस्यां सरोवरे रोहति रुह–क। १पद्मे २सारसखगे च पुंस्त्री० अमरः स्त्रियां ङीष्।

**सरस्वत्** पु० सरांसि जलानि सन्त्यस्य मतुप् मस्य वः। १सरोवरे २सागरे ३नदे ४रसिके त्रि० मेदि० ५नद्यां ६वाण्यां ७गवि ८स्त्रीरत्ने स्त्री मेदि० ङीप्। सा च ९ज्योतिष्मत्यां १०ब्राह्म्यां शक्तौ राजनि०। ११देवीभेदे मेदि० १२सोमलतायां शब्दच०। १३बुद्धशक्तिभेदे त्रिका० १४दुर्गायाम् "सराः सरणशीलत्वात् शेयाख्ये सप्त कीर्त्तिताः। अति प्रापणदाने वा तेन देवी सरस्वती" देवीपु०४५अ० तन्नामनिरुक्तिः। पृषो०। १५वागधिष्ठातृदेव्याम् "आविर्बभूव तत्पश्चात् मुखतः परमात्मनः। एका देवी शुक्लवर्णा वीणापुस्तकधारिणी। वागधिष्ठातृदेवी सा कवीनामिष्टदेवता। शुद्धसत्त्वस्वरूपा च शान्तरूपा सरस्वती" ब्रह्मवै० प्र०ख० ३अ०। तत्रैव गणे० ७०अ० "वागधिष्ठात्री या देवी शास्त्रज्ञानप्रदा सदा। कृष्णकण्ठोद्भवा या च सा च देवी सरस्वती"। "बन्धुजीवञ्च द्रोणञ्च सरस्वत्यै न दापयेत्" मलमासत०। तत्पूजादिकं तन्त्रसा० दृश्यम्। १६सन्ध्याकाले उपास्यदेवतायां गायत्रीशब्दे २५८३ पृ० दृश्यम्। सरः ब्रह्मसरः उत्पत्तिस्थानत्वेनास्त्यस्याः मतुप् मस्य वः ङीप्। १७नदीभेदे सरस्वतीनद्या तथोत्पत्तिकथा च "प्रसृतासि महाभागे सरसो ब्रह्मणः पुरा। जानन्ति त्वां सरित्श्रेष्ठे मुनयः संशितव्रताः" भा० श० ५अ०। तस्याश्च सप्तनामत्वं यथा "राजन्! सप्त सरस्वत्यो याभिर्व्याप्तमिदं जगत्। आहूता बलवद्भिर्हि तत्र तत्र सरस्वती। सुप्रभा१ काञ्चनाक्षी२ च विशाला३ च मनोरमा४। सरस्वती५ चौघवती६ सुरेणु७र्विमलोदका" भा०श० ३८अ०। तासां नामकारणञ्च तत्राध्याये दृश्यम्। तस्या माहात्म्यं तत्रैव सारस्वतोपाख्याने दृश्यम्। [पकोषः।

**सरा** स्त्री सृ–अच्। १प्रसारण्यां राजनि० २निर्झरे त्रिका०

**सराव** पु० सरं जलमवति अव–अण्। १जलाधारे मृण्मये पात्रभेदे(सरा) हिक्षपकोषः। सह रावेण। २सशब्दे त्रि०

**सरि** पुंस्त्री० सृ–इन् स्त्रीत्वपक्षे वा ङीप्। निर्झरे हेमच०।

**सरिका** स्त्री सरोऽस्त्यस्याः ठन् सृ–वुन् वा। हिङ्गुपत्रिकायाम् शब्दर०।

**सरित्** स्त्री सृ–इति। १नद्याम् अमरः २सूत्रे शब्दमा०। "क्रियाकारकरूपत्वात् सरणाच्च सरिन्मता" देवीपु० ४५अ० निरुक्तायां ३दुर्गायाम्।

**सरित्पति** पु० ६त०। समुद्रे अमरः। सरिन्नाथादयोऽप्यत्र

**सरित्वत्** पु०सरित् स्वामित्वेनास्त्यस्य मतुप् मस्य वः तान्तत्वेन पदत्वाभावात् न तस्य दः। समुद्रे।

**सरित्सुत** पु० ६त०। गङ्गापुत्रे भीष्मे।

**सरिताम्पति** पु० ६त० अलुक् समा०। १समुद्रे शब्दर०। सरितांनाथादयोऽप्यत्र।

**सरिद्वरा** स्त्री सरित्सु वरा श्रेष्ठा। गङ्गायाम् हेमच०।

**सरिल** न० सृ–इलच्। जले अमरटीकायां भरतः।

**सरिमन्** पु० सृ–इमनि। १वायौ २गतौ च उणादि०।

**सरिषप** पु० सर्षप+पृषो०। सर्षपे त्रिका०।

**सरीसृप** पुंस्त्री० वक्रं सर्पति सृप–यङो लुक्, अच्। १सर्पे अमरः। २वृश्चिकादौ। ज्योतिषोक्तेषु ३मीनवृश्चिककर्कटराशिषु "वृश्चिकराशिस्तु त्रिभिः सरीसृपत्वेन निर्दिष्टः" ज्यो०त०। "खगपतिवशे तिष्ठन्त्येते विहाय सरीसृपान्" ज्यो०त० बहुवचनात् मीनकर्कटयोर्ग्रहणम्

**सरु** पु० सृ–उन्। खड्गादिमुष्टौ सारसुन्दरी।

**सरूप** त्रि०समानं रूपमस्य समानस्य सः। तुल्यरूपे सदृशे जटा०

**सरोज** न० सरसि जले जायते जन–ड। १पद्मे हेमच०। २सारसखगे पुंस्त्री०स्त्रियां ङीष्। ३सरोजातमात्रे त्रि०।

**सरोजन्मन्** न० सरसि जले जन्म यस्य। १पद्मे हेमच०। २सारसखगे ३तडागजातमात्रे त्रि०।

**सरोजिन्** पु० सरोजं विष्णुनाभिपद्ममुत्पत्तिस्थानत्वेनास्त्यस्य इनि। चतुर्मुखे ब्रह्मणि त्रिका०।

**सरोजिनी** स्त्री सरोजानां समूहः तन्निकटदेशो वा इनि ङीप्। १पद्मसमूहे रत्नमा० २तद्युक्तदेशरूपायां पद्मलतायाम् ३पद्माधारदीर्घिकायाञ्च मेदि०। [स्त्रियां ङीष्।

**सरोत्सव** पुंस्त्री०सरे जले उत्सवोऽस्य। सारसखगे शब्दर०

**सरोरुह्(ह)** सरसि रोहति रुह–क्विप् क वा। १पद्मे